# PAPER VI

अधिकतम अंक 100

**खण्डः - 'क' ( अपठित-अवबोधनम् )** **(10)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

एकदा द्वौ धनिकौ आस्ताम्। तयोः धनिकयोः मध्ये विवादः जातः। द्वौ अपि न्यायालयं गतवन्तौ। एकः धनिकः अचिन्तयत्- अहं लक्षं रूप्यकाणि न्यायाधीशाय उत्कोचरूपेण (रिश्वतरूपेण) ददामि इति। सः स्यूते लक्षं रूप्यकाणि स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीशः तस्य विचारं ज्ञात्वा क्रुद्धः अभवत्। धनिकः न्यायाधीशम् अवदत्- भोः! मत्सदृशाः लक्षरूप्यकाणां दातारः दुर्लभाः एव। न्यायाधीशः धनिकम् अवदत्- लक्षरूप्यकाणां दातारः कदाचित् अन्ये अपि भवेयुः परन्तु लक्षरूप्यकाणां निराकर्त्तारः मत्सदृशाः अन्ये विरलाः एव। अतः कृपया गच्छतु। न्यायस्थानं मलिनं मा करोतु। लज्जितः धनिकः धनस्यूतं गृहीत्वा ततः निर्गतः।

I. एकपदेन उत्तरत - ½×4=2

(i) कयोः मध्ये विवादः जातः?

(ii) कः लज्जितः भूत्वा निर्गतः?

(iii) द्वौ कुत्र गतवन्तौ?

(iv) धनिकः कति रूप्यकाणि न्यायाधीशाय दातुम् इच्छति स्म?

II. पूर्णवाक्येन उत्तरत - 1×2=2

(i) धनिकः न्यायाधीशं किम् अवदत्?

(ii) न्यायाधीशः धनिकं किम् अवदत्?

III. अस्य अनुच्छेदस्य उपयुक्तशीर्षकं लिखत। 2



https://www.evidyarthi.in

IV. निर्देशानुसारम् उत्तरत – 1×4=4

(क) 'अहं लक्षं रूप्यकाणि न्यायाधीशाय ददामि इति' अत्र 'ददामि' क्रियापदस्य कर्तृपदं किम्?

(ख) 'लज्जितः' इति विशेषणपदस्य विशेष्यपदं किम्?

(ग) 'निर्धन' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(घ) 'द्वौ अपि न्यायालयं गतवन्तौ।' अस्मिन् वाक्ये किम् अव्ययपदम्?

## खण्डः – 'ख' (रचनात्मक-कार्यम्) (10)

2. भवत्याः नाम साक्षी अस्ति। भवती स्वविद्यालयस्य वनमहोत्सवस्य वर्णनं कुर्वन्ती स्वमित्रं गीतिकां प्रति पत्रं लिखति पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुनः उत्तरपुस्तिकायां लिखत। ½×10=5

परीक्षाभवनात्

तिथिः............................

प्रिये ............... (1)

(2) ............... नमस्ते।

ह्यः एव मम विद्यालये (3) ............... आयोजितः। सर्वे छात्राः ............... (4) आसन्। छात्राः स्व-अध्यापकैः सह पादपानाम् ............... (5) व्यस्ताः आसन्। मम विद्यालयस्य परिसरे तु ............... (6) अभवत्। एकादश-द्वादशकक्षयोः छात्राः तु विद्यालयात् बहिः गत्वा ............... (7) उभयतः पादपान् ............... (8)। सर्वे जनाः अस्माकं विद्यालयस्य छात्राणां प्रयासस्य ............... (9) कृतवन्तः। यदि सर्वे विद्यालयाः एवं कुर्युः तर्हि ............... (10) रक्षणं स्यात्।

भवदीया अभिन्ना सखी

साक्षी

| मञ्जूषा : | हरीतिमा, उत्साहिताः, प्रशंसां, आरोपितवन्तः, गीतिके, मार्गम्, आरोपणे, सस्नेहम्, पर्यावरणस्य, वनमहोत्सवः |
|---|---|



https://www.evidyarthi.in

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत। 1×5=5



मञ्जूषा : बालिकाः, शिक्षिका, व्यजनानि, वातानुकूलनयन्त्रम्, आसन्दाः, उत्पीठिका, तिष्ठन्ति, ध्यानेन शृण्वन्ति, विद्युत्-फलकम् (स्मार्टबोर्ड), महापुरुषाणां चित्राणि, अग्निशमनयन्त्रम्, भित्तौ, कक्षा

**खण्डः - 'ग' ( अनुप्रयुक्त-व्याकरणम् )** **(40)**

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णं वाक्यं लिखत - 1×4=4

(क) स्वामी श्रद्धानन्दः गुरुकुल-काँगड़ी विश्वविद्यालयं स्थापितवान्।

(ख) सत्सङ्गतिः मान+उन्नतिं दिशति।

(ग) शृगालः तदैव मूषकान् खादितुं चिन्तयति।

(घ) यदि+अपि महात्मा विठोवा बुभुक्षितः आसीत् तथापि सः क्रोधं न कृतवान्।

5. कोष्ठकेषु प्रदत्तशब्दानाम् उचितरूपेण वाक्येषु रिक्स्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5

(क) एकदा एकः ........................ आसीत् (मुनि)

(ख) उत्तमः बालकः सर्वदा ........................ वचनस्य पालनं करोति। (मातृ)

(ग) ........................ संसारे सर्वे सुखयुक्ताः रोगरहिताः च भवन्तु। (इदम्)

(घ) अहम् एकं ........................ जानामि। (साधु)

(ङ) पुत्रः ........................ वस्त्राणि प्रेषयति। (पितृ)



https://www.evidyarthi.in

6. अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य पूर्णं वाक्यं लिखत – 1×4=4

(क) ........................ बालिका नृत्यं करोति। (1)

(ख) मम कक्षायां ........................ छात्राः सन्ति। (53)

(ग) गजः ........................ कदलीफलानि अखादत्। (75)

(घ) उद्याने ........................ वृक्षाः सन्ति। (96)

7. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत- 1×5=5

(क) मन्दिरात् ........................ पुष्प-विक्रेता अस्ति।

(ख) भवतः गृहं ........................ अस्ति?

(ग) अद्य सोमवासरः अस्ति ........................ च मङ्गलवासरः भविष्यति।

(घ) यत्र श्रमः भवति ........................ अवश्यमेव साफल्यम् अपि तिष्ठति।

(ङ) ........................ अहं दिल्ल्यां निवसामि।

मञ्जूषा – | तत्र, बहिः, अधुना, कुत्र श्वः |

8. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत – 1×4=4

(क) मार्गे सः सर्वदा कष्टम् अनुभवति।

(ख) सज्जनः धर्मम् आ+चरति।

(ग) सः खडगेन प्रहरति।

(घ) रमेशः प्रति+वदति यत् अहम् अद्यारभ्य सत्यं वदिष्यामि।

9. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत – 1×5=5

(क) मार्गम् उभयतः वृक्षाः सन्ति।

(ख) बालकः पित्रा सह गच्छति।

(ग) वृक्षस्य उपरि वानरः तिष्ठति।

(घ) सजीवकुमारः पाककलायां निपुणः अस्ति।

(ङ) ईश्वरात् ऋते कः अस्मान् रक्षेत्?

10. अधोलिखितानां समस्तपदानां समासस्य नामानि लिखत – ½×6=3

(क) उपगङ्गम्

(ख) निर्जनम्

(ग) चक्रपाणिः



https://www.evidyarthi.in

(घ) बहुफलः

(ङ) अनुविष्णु

(च) जितेन्द्रियः

11. कोष्ठकेषु प्रदत्तधातूनाम् उचितरूपेण वाक्येषु रिक्तस्थानानि पूरयित्वा पूर्णं वाक्यं लिखत - 1×5=5

(क) बालकाः मातरं ..................। (नम्, लट्लकारे)

(ख) यूयम् असत्यभाषणं ..................। (त्यज्, लोट्लकारे)

(ग) आवां लेखं ..................। (लिख्, लृट्लकारे)

(घ) पुत्रः पितरम् ..................। (सेव्, लङ्लकारे)

(ङ) त्वं कदापि दुर्वचनानि न ..................। (वद्, विधिलिङ्लकारे)

12. अधोलिखितवाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत - 1×5=5

(क) शिष्यस्य भावम् अवगत्य महर्षिः अकथयत्।

(ख) नागरिकः महात्मानं गृहम् आ+गम्+तुमुन् अकथयत्।

(ग) मया समयेन गृहकार्यं कृतम्।

(घ) महात्मा यथासमयं तस्य गृहं गम्+क्तवतु।

(ङ) शृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म।

## खण्डः - 'घ' (पठित-अवबोधनम्) (40)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 5

एकदा एकस्मिन् वने एकः शृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म। तदैव सः मूषकाणां समूहं दृष्ट्वा तान् खादितुं चिन्तयति। तस्य मूषकसमूहस्य राजा हृष्ट-पुष्टः आसीत्। शृगालः मूषकसमूहम् अनुसरति। तान् खादितुम् इच्छन् सः मूषकाणां बिलस्य समीपं गच्छति। सः शृगालः किञ्चित् चिन्तयित्वा मूषकाणां बिलात् बहिः सूर्यं प्रति उद्घाटितेन मुखेन तिष्ठति। अन्यस्मिन् दिवसे प्रातः मूषकाः शृगालं दृष्ट्वा चकिताः भवन्ति। मूषकराजः तं पृच्छति-भवान् एवं किमर्थं स्थितः अस्ति? शृगालः अवदत्-यदि अहं चतुरः पादान् धरायां स्थापयिष्यामि तदा पृथ्वी अधः गमिष्यति। अतः एव अहम् एवं स्थितः अस्मि।

(I) एकपदेन उत्तरत - ½×2=1

(क) शृगालः कुत्र भ्रमति स्म?

(ख) मूषकसमूहस्य राजा कीदृशः आसीत्?



https://www.evidyarthi.in

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) मूषकराजः श्रृगालं किम् अपृच्छत्?

(ख) श्रृगालः किम् अवदत्?

(III) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'एकदा एकस्मिन् वने एकः श्रृगालः भोजनं प्राप्तुम् इतस्ततः भ्रमति स्म।'
अस्मिन् वाक्ये श्रृगालः इति कर्तृपदस्य क्रियापदं किम्?

(ख) 'राजा हृष्ट-पुष्टः' अनयोः पदयोः विशेष्यपदं किम्?

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

वाणी रसवती यस्य, यस्य श्रमवती क्रिया।
लक्ष्मीः दानवती यस्य, सफलं तस्य जीवितम्।।

(I) एकपदेन उत्तरत – ½×2=1

(क) वाणी कीदृशी स्यात्?

(ख) क्रिया कीदृशी भवेत्?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) कस्य जीवितं सफलं भवति?

(ख) का दानवती स्यात्?

(III) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'जीवनम्' इति अर्थे श्लोके किं पदं प्रयुक्तम्?

(ख) 'श्रमवती क्रिया' अनयोः पदयोः विशेष्यपदं किम्?

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 5

अष्टमी कक्षा। संस्कृतस्य कक्षा। सर्वे छात्राः कक्षायां परस्परं चर्चायां मग्नाः सन्ति। श्यामपट्टे एका सूक्तिः लिखिता अस्ति –

"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः"

(तदैव मान्यवरः संस्कृतस्य अध्यापकः कक्षां प्रविशति।)

सर्वे छात्राः – (उत्थाय) वयं प्रणमामः मान्यवर!

आचार्यः – सुखिनः भवन्तु। शुभपन्थाः। तिष्ठन्तु।

(सर्वे जिज्ञासया आचार्यं पश्यन्ति।)



https://www.evidyarthi.in

आचार्यः – (सर्वान् दृष्टा) किं भवन्तः किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति?

सर्वे – (मिलित्वा) आम् मान्यवर! वयम् अस्माकं पूर्वराष्ट्रपतिमहोदयानां जीवनस्य विषये ज्ञातुम् इच्छामः। कृपया वदन्तु।

(I) एकपदेन उत्तरत – ½×2=1

(क) कस्य विषयस्य कक्षा अस्ति?

(ख) तदैव कः कक्षां प्रविशति?

(II) पूर्णवाक्येन उत्तरत – 1×2=2

(क) आचार्यः सर्वान् दृष्टवा किं पृच्छति?

(ख) सर्वे मिलित्वा किं वदन्ति?

(III) निर्देशानुसारम् उत्तरत – 1×2=2

(क) 'किं भवन्तः' किञ्चित् विशिष्टं कथयितुम् अथवा ज्ञातुम् इच्छन्ति' अस्मिन् वाक्ये भवन्तः इति कर्तृपदस्य क्रियापदं किम्?

(ख) 'शिक्षकः' इति पदस्य पर्यायपदं नाट्यांशात् चित्वा लिखत।

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा पूर्णं भावार्थं लिखत – ½×10=5

(क) शरीरमाद्यं खलु धर्मसाधनम्।

भावार्थः – वयं ..................(1) कार्याणि शरीरेण एव कुर्मः। ..................(2) एव अस्माकं सर्वेषाम् एव ..................(3) प्रमुखसाधनम् अस्ति। शरीरं धर्मस्य ..................(4) साधनम् अस्ति। अतः ..................(5) सदा स्वस्थाः भवेयुः।

मञ्जूषा – | पालनस्य, कर्तव्यानां, शरीरेण, सर्वाणि, शरीरम् |

(आ) चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च।

भावार्थः – ..................(1) जीवनं सदैव ..................(2) न भवति। ..................(3) सदैव सुखमयं न भवति। मनुष्यस्य ..................(4) सुखस्य दुःखस्य च स्थितिः चक्रम् इव भवति। सुखानि दुःखानि च ..................(5) आगच्छन्ति गच्छन्ति वा।

मञ्जूषा – | जीवने, दुःखमयं, क्रमानुसारेण, मनुष्यस्य एवमेव |



https://www.evidyarthi.in

17. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत –½×10=5

(अ) सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चित् दुःखभाग् भवेत्।।
अन्वयः – सर्वे ..................(1) भवन्तु, ..................(2) निरामयाः सन्तु, सर्वे ..................(3) पश्यन्तु, कश्चित् ..................(4) मा ..................(5)।

(आ) पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः।।
अन्वयः – नद्यः स्वयम् एव ..................(1) न पिबन्ति, वृक्षाः स्वयं ..................(2) न खादन्ति, ..................(3) सस्यं खलु (स्वयं) न ..................(4), सतां विभूतयः ..................(5) (भवन्ति)।

18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पूर्णानि वाक्यानि लिखत। (केवलं क्रमसङ्ख्या न लेखनीया।) 1×4=4

(क) एकः दर्शनार्थी नागरिकः रात्रिभोजाय तं महात्मानं प्रार्थयत्।
(ख) रात्रौ महात्मा विठोवा बुभुक्षितः एव अतिष्ठत्।
(ग) यदा महात्मा नागरिकस्य गृहं गतवान् तदा सः कुत्रचित् गतः आसीत्।
(घ) महात्मा विठोवा एकस्मात् नगरात् बहिः कुटीरं निर्माय वसति स्म।

19. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत। (केवलं प्रश्नवाचकं पदं न लेखनीयम्।) 1×5=5

(क) महर्षिः दयानन्दः काशीनगरे अतिष्ठत्।
(ख) यात्री महर्षेः कुटीरस्य समीपम् अगच्छत्।
(ग) जन्मभूमिः माता इव अस्ति।
(घ) महर्षिः भारते अभ्रमत्।
(ङ) मया द्विवारं भवतः अपमानः कृतः।

20. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कृत्वा लिखत – 1×6=6

| | |
|---|---|
| (i) निरामयाः | (क) सत्कार्याणि |
| (ii) उपास्यानि | (ख) रोगरहिताः |
| (iii) सुचरितानि | (ग) नादम् |
| (iv) अनवद्यानि | (घ) सज्जनाः |
| (v) सुकृतिनः | (ङ) पालनीयानि |
| (vi) घोषम् | (च) अनिन्दनीयानि |


https://www.evidyarthi.in